# Agni Stuti Devaih Krita

# અગ્નિસ્તુતિઃ દેવૈઃ કૃતા

## Document Information

Text title : Agni Stuti Devaih Krita

File name : agnistutiHdevaiHkRRitA.itx

Category : deities_misc, stuti

Location : doc_deities_misc

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# Agni Stuti Devaih Krita

# અગ્નિસ્તુતિઃ દેવૈઃ કૃતા

(સૌરપુરાણે ૬૧-અધ્યાયાન્તર્ગતા)

દેવા ઊચુઃ -
જલભીરો જલોત્પન્ન જલાજલજલેચર ।
જલજામલપત્રાક્ષ યજ્ઞદેવ હુતાશન ॥ ૧॥

કૃષ્ણકેતો કૃષ્ણવર્ત્મન્સ્વર્ગમાર્ગપ્રદર્શક ।
યજ્ઞાહુતિહુતાહાર યજ્ઞાહાર હરાકૃતે ॥ ૨॥

પૂર્ણગર્ભ ગવાં ગર્ભ જય દેવ મહાશન ।
તમોહર મહાહાર સ્વાહાભર્તર્નમોઽસ્તુ તે ॥ ૩॥

હવ્યવાહન સમાર્ચે ચિત્રભાનો મહાદ્યુતે ।
અનલાગ્ને યજ્ઞમુખ જય પાવક સર્વગ ॥ ૪॥

વિભાવસો મહાભાગ વેદભાષાર્થભાષણ ।
કૃશાનો ઋતુસમ્ભારપ્રિય વિશ્વપ્રભાવન ॥ ૫॥

સાગરામ્બુધૃતં દેવ ત્વમશ્વમુખસંશ્રિતઃ ।
પિબંશ્ચૈવોદ્ગિરંશ્ચૈવ ન તૃપ્તિમધિગચ્છસિ ॥ ૬॥

ત્વં વાક્યેષ્વનુવાક્યેષુ નિષત્સૂપનિષત્સુ ચ ।
બ્રાહ્મણા બ્રહ્મયોનિં ત્વાં સ્તુવન્તિ ત્વત્પરાયણાઃ ॥ ૭॥

તુભ્યં કૃત્વા નમો વિપ્રાઃ સ્વકર્મવિહિતાં ગતિમ્ ।
બ્રહ્મેન્દ્રવિષ્ણુરુદ્રાણાં લોકાન્સમ્પ્રાપ્નુવન્તિ ચ ॥ ૮॥

ત્વમન્તઃ સર્વભૂતાનાં ભુક્તં ભોક્તા જગત્પતે ।
પચસે પચતાં શ્રેષ્ઠ ત્રીઁલ્લોકાન્સઙ્ક્ષયિષ્યસિ ॥ ૯॥

સાક્ષી લોકત્રયસ્યાસ્ય ત્વયા તુલ્યો ન વિદ્યતે ।
શરણં ભવ દેવાનાં વિશ્વત્રયમહેશ્વર ॥ ૧૦॥

ઇત્યેવં સ્તૂયમાનોઽસાવુત્થાય જ્વલનસ્તદા ।
દેવાન્પ્રદક્ષિણીકૃત્ય યયૌ શમ્ભુગૃહં દ્વિજાઃ ॥ ૧૧॥

તત્રાપશ્યત્પ્રતીહારં મહાદેવસમં બલે ।
પૂજિતં સેન્દ્રકૈર્દેવૈર્મહાદેવદિદૃક્ષુભિઃ ॥ ૧૨॥

ઇતિ સૌરપુરાણે એકષષ્ઠિતમોઽધ્યાયાન્તર્ગતા દેવૈઃ કૃતા
અગ્નિસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by PSA Easwaran

*Agni Stuti Devaih Krita*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*